विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग दशम् विषय संस्कृत शिक्षक श्यामउदय सिंह

ता:-२७/०५/२०२० (बोर्ड बेस्ड क्वेश्चन)

अधोलिखितनाट्याशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि संस्कृतभाषया लिखत-

# राम:--एषभवतो: सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि -क्षत्रियकुल -पितामहयो: सूर्यचन्द्रयो: को वा भवतोर्वंशस्य कर्ता ।

लव:--भगवन् सहस्रदीधिति :

राम:--कथमस्मत्समानाभिजनौ संवृत्तौ?

विदूषक:--द्वयोरप्येकमेव प्रतिवचनम्?

लव:--भ्रातरावावां सोदर्यो।

राम:--समरूप: शरीरसन्निवेश: ।वयसस्तु न किञ्चिदनन्तरम ।

लव:--आवां यमलौ।

राम:--सम्प्रति युज्यते।किं नामधेयम्।

लव:--आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य )आर्योऽपि गुरुचरण वंदनायां ..........................

कुश:--अहमपि कुश इत्यात्मानं श्रावयामि।

१.एकपदेन उत्तरत-

(i) क्षत्रियकुलस्य पिताज्ञहौ कौ स्त:?

(ii)रामस्य वंशस्य कर्ता क:?

२.पूर्णवाक्येन उत्तरत-

(i) कुशलवयो: मध्ये कीदृशी समानता आसीत्?

(ii)राम: किमर्थं तयो: कुल विषये अपृच्छत्?

३.भाषिककार्यम्-

(i) अत्र 'युगलौ' इत्यर्थे किं पदं प्रयुक्तम्?

(ii)’आर्यस्य वन्दनायां ' अत्र 'आर्यस्य' इति पदम् कस्य कृते प्रयुक्तम्?

(iii)'भानु:' इति पदस्य क:पर्याय :आगत:?

(iv)'नाट्यांशे' 'सौन्दर्यावलोकजनितेन' इति विशेषणपदस्य विशेष्यपदम् अत्र किम् ?